॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय १

स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् ।
रामः सौमित्रिसहितो विललापाकुलेन्द्रियः ॥ १॥

तस्य दृष्टवैव तां हर्षादिन्द्रियाणि चकम्पिरे ।
स कामवशमापन्नः सौमित्रिमिदमब्रवीत् ॥ २॥

सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम् ।
यत्र राजन्ति शैलाभा द्रुमाः सशिखरा इव ॥ ३॥

मां तु शोकाभिसन्तप्तमाधयः पीडयन्ति वै ।
भरतस्य च दुःखेन वैदेह्या हरणेन च ॥ ४॥

अधिकं प्रविभात्येतन्नीलपीतं तु शाद्वलम् ।
द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितम् ॥ ५॥

सुखानिलोऽयं सौमित्रे कालः प्रचुरमन्मथः ।
गन्धवान्सुरभिर्मासो जातपुष्पफलद्रुमः ॥ ६॥

पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम् ।
सृजतां पुष्पवर्षाणि वर्षं तोयमुचाम् इव ॥ ७॥

प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ।
वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥ ८॥

मारुतः सुखं संस्पर्शे वाति चन्दनशीतलः ।
षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु ॥ ९॥

गिरिप्रस्थेषु रम्येषु पुष्पवद्भिर्मनोरमैः ।
संसक्तशिखरा शैला विराजन्ति महाद्रुमैः ॥ १०॥

पुष्पिताग्रांश्च पश्येमान्कर्णिकारान्समन्ततः ।
हाटकप्रतिसञ्छन्नान्नरान्पीताम्बरानिव ॥ ११॥

अयं वसन्तः सौमित्रे नानाविहगनादितः ।
सीतया विप्रहीणस्य शोकसन्दीपनो मम ॥ १२॥

मां हि शोकसमाक्रान्तं सन्तापयति मन्मथः ।
हृष्टः प्रवदमानश्च समाह्वयति कोकिलः ॥ १३॥

एष दात्यूहको हृष्टो रम्ये मां वननिर्झरे ।
प्रणदन्मन्मथाविष्टं शोचयिष्यति लक्ष्मण ॥ १४॥

विमिश्रा विहगाः पुम्भिरात्मव्यूहाभिनन्दिताः ।
भृङ्गराजप्रमुदिताः सौमित्रे मधुरस्वराः ॥ १५॥

मां हि सा मृगशावाक्षी चिन्ताशोकबलात्कृतम् ।
सन्तापयति सौमित्रे क्रूरश्चैत्रवनानिलः ॥ १६॥

शिखिनीभिः परिवृता मयूरा गिरिसानुषु ।
मन्मथाभिपरीतस्य मम मन्मथवर्धनाः ॥ १७॥

पश्य लक्ष्मण नृत्यन्तं मयूरमुपनृत्यति ।
शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुषु ॥ १८॥

मयूरस्य वने नूनं रक्षसा न हृता प्रिया ।
मम त्वयं विना वासः पुष्पमासे सुदुःसहः ॥ १९॥

पश्य लक्ष्मण पुष्पाणि निष्फलानि भवन्ति मे ।
पुष्पभारसमृद्धानां वनानां शिशिरात्यये ॥ २०॥

वदन्ति रावं मुदिताः शकुनाः सङ्घशः कलम् ।
आह्वयन्त इवान्योन्यं कामोन्मादकरा मम ॥ २१॥

नूनं परवशा सीता सापि शोचत्यहं यथा ।
श्यामा पद्मपलाशाक्षी मृदुभाषा च मे प्रिया ॥ २२॥

एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः ।
तां विचिन्तयतः कान्तां पावकप्रतिमो मम ॥ २३॥

तां विनाथ विहङ्गोऽसौ पक्षी प्रणदितस्तदा ।
वायसः पादपगतः प्रहृष्टमभिनर्दति ॥ २४॥

एष वै तत्र वैदेह्या विहगः प्रतिहारकः ।
पक्षी मां तु विशालाक्ष्याः समीपमुपनेष्यति ॥ २५॥

पश्य लक्ष्मण संनादं वने मदविवर्धनम् ।

पुष्पिताग्रेषु वृक्षेषु द्विजानामुपकूजताम् ॥ २६ ॥

सौमित्रे पश्य पम्पायाश्चित्रासु वनराजिषु ।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥ २७ ॥

एषा प्रसन्नसलिला पद्मनीलोत्पलायता ।
हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ॥ २८ ॥

चक्रवाकयुता नित्यं चित्रप्रस्थवनान्तरा ।
मातङ्गमृगयूथैश्च शोभते सलिलार्थिभिः ॥ २९ ॥

पद्मकोशपलाशानि द्रष्टुं दृष्टिर्हि मन्यते ।
सीताया नेत्रकोशाभ्यां सदृशानीति लक्ष्मण ॥ ३० ॥

पद्मकेसरसंसृष्टो वृक्षान्तरविनिःसृतः ।
निःश्वास इव सीताया वाति वायुर्मनोहरः ॥ ३१ ॥

सौमित्रे पश्य पम्पाया दक्षिणे गिरिसानुनि ।
पुष्पितां कर्णिकारस्य यष्टिं परमशोभनाम् ॥ ३२ ॥

अधिकं शैलराजोऽयं धातुभिस्तु विभूषितः ।
विचित्रं सृजते रेणुं वायुवेगविघट्टितम् ॥ ३३ ॥

गिरिप्रस्थास्तु सौमित्रे सर्वतः सम्प्रपुष्पितैः ।
निष्पत्रैः सर्वतो रम्यैः प्रदीपा इव कुंशुकैः ॥ ३४ ॥

पम्पातीररुहाश्चेमे संसक्ता मधुगन्धिनः ।
मालतीमल्लिकाषण्डाः करवीराश्च पुष्पिताः ॥ ३५ ॥

केतक्यः सिन्दुवाराश्च वासन्त्यश्च सुपुष्पिताः ।
माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च सर्वशः ॥ ३६ ॥

चिरिबिल्वा मधूकाश्च वञ्जुला बकुलास्तथा ।
चम्पकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः ॥ ३७ ॥

नीपाश्च वरणाश्चैव खर्जूराश्च सुपुष्पिताः ।
अङ्कोलाश्च कुरण्टाश्च चूर्णकाः पारिभद्रकाः ॥ ३८ ॥

चूताः पाटलयश्चैव कोविदाराश्च पुष्पिताः ।
मुचुकुन्दार्जुनाश्चैव दृश्यन्ते गिरिसानुषु ॥ ३९ ॥

केतकोद्दालकाश्चैव शिरीषाः शिंशपा धवाः ।
शाल्मल्यः किंशुकाश्चैव रक्ताः कुरबकास्तथा ।
तिनिशा नक्त मालाश्च चन्दनाः स्यन्दनास्तथा ॥ ४० ॥

विविधा विविधैः पुष्पैस्तैरेव नगसानुषु ।
विकीर्णैः पीतरक्ताभाः सौमित्रे प्रस्तराः कृताः ॥ ४१ ॥

हिमान्ते पश्य सौमित्रे वृक्षाणां पुष्पसम्भवम् ।
पुष्पमासे हि तरवः सङ्हर्षादिव पुष्पिताः ॥ ४२ ॥

पश्य शीतजलां चेमां सौमित्रे पुष्करायुताम् ।
चक्रवाकानुचरितां कारण्डवनिषेविताम् ।
प्लवैः क्रौञ्चैश्च सम्पूर्णां वराहमृगसेविताम् ॥ ४३ ॥

अधिकं शोभते पम्पाविकूजद्भिर्विहङ्गमैः ॥ ४४ ॥

दीपयन्तीव मे कामं विविधा मुदिता द्विजाः ।
श्यामां चन्द्रमुखीं स्मृत्वा प्रियां पद्मनिभेक्षणाम् ॥ ४५ ॥

पय सानुषु चित्रेषु मृगीभिः सहितान्मृगान् ।
मां पुनर्मृगशावाक्ष्या वैदेह्या विरहीकृतम् ॥ ४६ ॥

एवं स विलपंस्तत्र शोकोपहतचेतनः ।
अवेक्षत शिवां पम्पां रम्यवारिवहां शुभाम् ॥ ४७ ॥

निरीक्षमाणः सहसा महात्मा
सर्वं वनं निर्झरकन्दरं च ।
उद्विग्नचेताः सह लक्ष्मणेन
विचार्य दुःखोपहतः प्रतस्थे ॥ ४८ ॥

तावृष्यमूकं सहितौ प्रयातौ
सुग्रीवशाखामृगसेवितं तम् ।
त्रस्तास्तु दृष्ट्वा हरयो बभूवुर्
महौजसौ राघवलक्ष्मणौ तौ ॥ ४९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿